Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 2 | ISSN : 2581- 6306

# वैदिकदर्शनेषु मोक्षस्यावधारणा



डा. सुदेष्णा दाशः
अतिथिप्राध्यापिका,
अद्वैतवेदान्तविभागः,
राजकीयसंस्कृतमहाविद्यालयः,
बारिपादा, मयूरभञ्जम्।

**Article Info**
Volume 4, Issue 2
Page Number : 71-74
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 20 March 2021
Published : 28 March 2021

**सारांशः** –चत्वारो वेदाः उपनिषदः वैदिकसाहित्यानि सर्वत्रापि मोक्षस्य उद्घोषणा स्पष्टतया क्रियते। वैदिकषड्दर्शनेष्वपि कैवल्यापवर्गमोक्षेति विभिन्नपदेन तदेव रहस्य प्राधान्येन विवेच्यते। प्रपत्रेऽस्मिन् मोक्षस्वरूपं मोक्षसाधनानि च वैदिकदार्शनिकदिशा प्रस्तुयन्ते ।

मुख्यशब्दः – अपवर्गः, पृथग्भावः, विमोक्षः, दुःखम्, कैवल्य, मोक्षः, रहस्य।

---

दृश्यमानेऽस्मिन् जगति अवलोकयामो वयं यत् आबालवृद्धाः सर्वेऽपि जनाः सुखमेव सर्वदा वाञ्छन्ति नैव केनापि दुःखस्य परिकल्पनाऽपि क्रियते। येन केन च प्रकारेण सुखायैव सर्वे प्रयत्नशीलाः कर्त्तव्याकर्त्तव्यविचारशून्याःयत्र तत्र विभिन्नेषु मन्दिरेषु विभिन्नाना गुरूणां प्रवचनेषु सत्सगेषु च चङ्क्रम्यमाणाः पुनरपि सुखेन वचिताः दृश्यन्ते। अस्य कारणमिद यत् एतस्मिन् अध्यात्मरहिते भौतिकुयगे शरीरमाद्यं खलु भोगसाधनमित्येव मन्यमानाः भौतिकसुखमेव प्राप्तकामाः प्रयतन्ते यच्च सुखं नश्वरं असार्वकालिकं कालान्तरे दुःखप्रदं नष्टे पदार्थे विनष्टं च सुख भवति। अत एव अस्माकम् अक्षयसुखतत्त्वज्ञैः ऋषिमहर्षभिः त्रिविधदुःखात्यन्तविवृत्यर्थं[1] परमानन्दप्राप्त्यर्थं च मोक्षमार्गस्य अवलम्बनं स्वीकृतम्। चत्वारो वेदाः उपनिषदः वैदिकसाहित्यानि सर्वत्रापि मोक्षस्य उद्घोषणा स्पष्टतया क्रियते। वैदिकषड्दर्शनेष्वपि कैवल्यापवर्गमोक्षेति विभिन्नपदेन तदेव रहस्य प्राधान्येन विवेच्यते। प्रपत्रेऽस्मिन् मोक्षस्वरूपं मोक्षसाधनानि च वैदिकदार्शनिकदिशा प्रस्तुयन्ते ।

**रामानुजसिद्धान्तेन-** भगवतः परमेश्वरस्यानुग्रहादेव जीवः संसारजालकाद्विमच्य मुक्त्यै कल्पते। मुक्ति प्रति कर्मसचिवो भगवदनुग्रहः एकहेतुः। वेदविहितकर्मानुष्ठानाच्चित्तशुधिः, चित्तशुद्धी सत्या ब्रह्मजिज्ञासा, ब्रह्मजिज्ञासायां भक्त्युदयः, भक्त्युद्रेकादेव ब्रह्मावाप्तिः स एव मोक्ष इति विवेकः। उक्तञ्च, "उभयपरिकर्मित स्वान्तस्यैकान्तिकात्यन्तिक भक्तियोगलभ्यः" इति। उभयपदमत्र ज्ञानकर्मसमुच्चयं परामृशति। एष च भगवदनुग्रहः यदृच्छाफलकः न कारणान्तरजन्यः। भगवच्चरणशरणमेव सर्वात्मना तदनुग्रहोपोद्बलकः। आह च भगवान् यामुनाचार्यः आत्मबन्दारस्तोत्रे–

**न धर्मनिष्ठोऽस्मि न चात्मवेदी, न भवक्तिमाँस्त्वच्चरणारविन्दे।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**अकिञ्चनो नाऽन्यगतिः शरण्यं त्वत्पादमूलं शरण प्रपद्ये। इति दिक्।**

अद्वैतवादिनो यथा मुक्तावस्थायां जीवस्य ब्रह्मणि लयं स्वीकुर्वन्ति न तथा विशिष्टाद्वैतवादिनः। ते तु ब्रह्मसाम्यमेवाभिनन्दन्ति, न ब्रह्मभूयत्वम्। यद्यपि तेषां नये ब्रह्मणः सर्वज्ञत्वं सत्यसकल्पत्वञ्च मुक्तजीवः समधिगच्छति परं न सर्वकर्त्त्वं। सर्वकर्तृत्वन्तु केवलमीश्वरस्यैव। तथा सर्वदर्शनसग्रहेः –

**एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य तु।**

**सर्वकर्त्त्वमेवैकं तेभ्यो देवे विशिष्यते॥** (स–दुस.)

ब्रह्मैक्य जीवस्य विशिष्टाद्वैतवादिनो न सहन्ते। परिच्छिन्नस्य परिमितस्वतन्त्रसत्तात्मकस्य जीवस्य सर्वशक्तिमता विभुना ब्रह्मणा सहैकीभावस्य सर्वथाऽसम्भवात्। उक्तञ्च श्रीभाष्ये, नापि साधनानुष्ठानेन निरस्ताविद्यस्य परेण स्वरूपैक्यसम्भवः अविद्याश्रयत्वयोग्यस्य तदनन्त्वासम्भवात्।[2] इदमत्रावधेयम्– विशिष्टाद्वैतवादिनां, जीवात्मनः मुक्त्यवस्थायां ब्रह्मसारूप्य, न तु ब्रह्मैवः। नितयस्य सतो जीवात्मनो विनाशापत्तेः। न च स्तन्त्रसत्तात्मकस्य अजस्य तस्य विनाशः शक्यसम्भवः। ब्रह्माशभूतस्य कदाचिद् ब्रह्मणि लयः समभवेत् नास्माक नित्यस्य जीवस्य स्वतन्त्रसत्तामङ्गोकुर्वता विशिष्टाद्वैतवादिनाम् इति तेषामाशयः। निरञ्जनः परम साम्यमुपैति" इत्यादिरुतयोऽपि साम्यमुपदिशन्ति न तु तद्रूपताम् इति। 'अपि च स्वेन रूपेणाभिसम्पद्यते[3] स्वेन विशुद्धेनात्मरूपेण अभिसम्पद्यते। आत्मनो ब्रह्मत्वापत्तेरसम्भवात् इति भावः। इति संक्षेपः।

**निम्बार्कदर्शने मोक्षस्य परिशीलनम्-** निम्बार्कनये चिदचिदीश्वरस्वरूपो रामानुजमतेन सह संवदति, चिल्लक्षणों जीवः ज्ञानस्वरूपः ज्ञानमयो वा। इन्द्रियनिरपेक्ष एव स तत्तज्ज्ञानाधिगमे शक्तः। एतदर्थमेव जीवोऽसी प्रज्ञानघनः, स्वयंज्योतिरित्यादिपदैर्व्यप

–दिश्यते। यथा हि सूर्यः प्रकाशमयः प्रकाशश्रयश्च तथैव जीवो ज्ञानाश्रयी ज्ञातापि च। यद्यपि जीवस्य स्वरूपभूत गुणभूतञ्च ज्ञान ज्ञानाकारतया अभिन्न तथापि च। यद्यपि जीवस्य स्वरूपभूत गुणभूतञ्च ज्ञानं ज्ञानाकारतया अभिन्न तथापि धम्म्माधर्मिभावेनाऽनयोः ज्ञातज्ञानयों भेद एवेति निश्चितम्। उक्तञ्च दशश्लोक्याम्ः –

**ज्ञानस्वरूपञ्च हरेरधीनं, शरीरसंयोगवियोगयोग्यम्।**

**अणु हि जीवं प्रतिदेहभिन्नं, ज्ञातृत्ववनतं यदनन्तमाहुः॥**

जीवः कर्तृत्वे स्वतन्त्रः भोगे च परन्तत्रः ईश्वराधीन इति भावः अतः चेतनत्वेन ज्ञानाश्रयत्वेन वा साम्येऽपि नियम्यत्वेन से ब्रह्मणो भिद्यते। जीवों नियम्यः ब्रह्म च नियन्त। मुक्त्यवस्थायामपि जोव ईश्वराश्रित एवं. न तल्लीन इति।

जीवश्चाणुः नानाभेदभिन्नश्च। यद्यपि स ब्रह्मणोंऽश एव तथापि अंशो नात्र विभगपरः किन्तु शक्तिरूपः **"अंशो हि शक्तिरूपों ग्राहाः"**[4] इति। भगवत्प्रसादेन जीवस्य सत्यरूपावभासः। ततो मुक्तिः। बद्धजीवो द्विविधः मुमुक्षुर्भुकुश्चेति। अचित् जडात्मिका प्रकृतिः। सा च प्रकृताऽप्रकृतकालभेदेन त्रिविधा। तत्र प्राकृतिक महत्त्वादारभ्य महाभूतपर्यन्तम्। अप्राकृतिक निखिलचैतन्यात्मक जगत्। कालश्च जगतः समस्तपरिणामजनकः। अखिलजगन्नियामकः सन्नपि स ब्रह्मणस्तु नियम्य एवा स च कालोऽखण्डरूपः स्वरूपेण नित्योऽपि कार्यरूपेणाऽनित्य एव। तस्य कार्यन्तु औपाधिकमेव। निम्बार्कनये ब्रह्म च समस्ताविद्यास्मितादिदोषशून्यम् अशेषज्ञानबलादि–कल्याणगुणविशेषनिधानम्।

**स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणकराशिम्।**

व्यूहाङ्गिनं ब्रह्म पर वरेण्य ध्यायेम कृष्ण कमलेक्षणं हरिम्।। (दशश्लोकी) यत्किञ्चिज्जगति दृष्टिगोचर तत्सर्व ब्रह्मव्याप्यम्। ईश्वरस्तु तेषां नये परब्रह्मनारायणभगवत्पुरुषोत्तमकृष्णादिनामाभिः जेगीयते। एषा नयेन प्रतिपत्तिद्वारा हि भगवदनुग्रह उदेति नान्यथा। ततः साक्षात्कारस्तदनन्तर मुक्तिरिति संक्षेपः।

**मध्वदर्शने मोक्षस्यानुशीलनम्**– साक्षाद्विष्णुरेवंश्वरः। से अनन्तगुणवान्। तद्गुणाश्च निरतिशया, निरवधिकाश्च। आनन्त्यं तस्मिन् सजातीयविजातीयोभयविधम्। उत्पत्ति–स्थिति– विनाश–नियमन –ज्ञानावरण–बन्ध–मोक्षाणां कर्त्ता विधाता भगवान् विष्णुरेव। सर्वज्ञश्च। जीवाज्जडप्रकृतेश्च स सर्वथा भिन्नः विलक्षणश्च। कज्ञानानन्दकल्याणगुणादयस्तस्य शरीरत्वेनोन्नीयन्ते। मुख्यया वृत्त्या स समस्तपदवाच्यः। अतः सशरीरत्वे सत्यपि तस्य नित्यता स्वतन्त्रता च न विहन्यते। एकः सन्नपि स नानारूपधारः। सस्तरूपेण च परिपूर्णः। अतः मत्स्याद्यवताररूपेणापि तस्य पूर्णता कथमपि न व्याकुलीभवति। उक्तञ्च माध्ववृहद्भाष्येः–

**अवतारादयो विष्णोः सर्वे पूर्णाः प्रकीर्तिताः।**

**पूर्ण च तत्परं पूर्ण पूर्णात्पूर्णाः समुद्गताः।।**

लक्ष्मीः माध्वाना परमात्मशक्तिरेव लक्ष्मीः। सा च सर्वथा परमात्मनोऽधीना सत्यपि ततो भिना। "परमात्मभिन्ना ततमात्राधीना लक्ष्मीः[5] तदेव माध्वनये, शक्तिशक्तिमतोनाभिदः। लक्ष्मीश्चेय भगवतो विष्णोः किञ्चिन्न्यूना सत्यपि निधतयमुक्ता नानारूपधारिणी भरावतो वभूरिव विलसति। यथा भगवान् विष्णुः दिव्यशरीरसम्पन्नः तथैव भगवती लक्ष्मीरपि अप्राकृतविग्रहवती। एत एव अक्षरा। उक्तञ्च माध्वभाध्येः

**"लक्ष्मीरक्षराऽदेहत्वात् अक्षरस्तत्परो हरिः।"** (ऐतरेयभाष्ये)

अपि च

**द्वाविमौ नित्यमुक्तौ तु परमः प्रकृतिस्तथा।**

**देशतः कालतश्चैव समव्याप्तादुभावजौ।।** (भागवत्तात्पर्यनिर्णये)

जीवो माध्वमते संसारी, कर्मानुगुण्येन सुखदुःखोपभोक्ता, जन्ममरणशीलश्च। स च त्रिविध :–– मुक्तियोग्यः, नित्यसंसारी, तमोयोग्यश्चेति। तत्र मुक्तियोग्या जीवा देव–ऋषि–पितृ–चकवर्ति– उत्तमभेदात् पञ्चविधाः। नित्यसंसारी, सर्वकालावच्छेदेन जन्मबन्धसरणिपतितः संसरणशीलः। एतत्कोटिंगता जीवाः मध्यमाः उच्यन्ते– "मध्यमा मानुषा ये तु संसृतियोग्याः सदैव हि" (भाता निर्णये) ते च न कदापि मुक्ति प्रपद्यन्ते। तमोयोगयानां जीवाना चातुर्विध्यम् दैत्यराक्षस–पिशाच अधमा इति। सर्वेऽप्यमी जीवा व्यक्तितो भिन्नाः। सर्वज्ञपरमात्मनस्तु सर्वथा भिन्नाः। न चेद जीवाना तारतम्य संसृत्वस्थायामेव, अपितु मुक्त्यवस्थायामपि तत् सम्भवति। "मानुषादि विरञ्चिपर्यन्ततारतम्यं विमुक्तिगतम्। (मध्वः) आनन्दानुभूतितारतम्यभेदश्च तेषा ज्ञानतारतम्यभेदात्। निरञ्जनः परमं साम्यमुपैति[6]। इत्यत्र साम्यपदं प्राचुर्यवचनं माध्वानाम्। ब्रह्मणः चिदंशमादार्यव, ब्रह्मणो जीवस्यैक्यमभिमतम् परं तदैक्यं न वास्तवम्। जीवब्रह्मणोरभेद एवैषामभ्युपगमः। तथा च माध्वाचार्यः

**जीवस्य तादृशत्वं च चित्त्वमात्रं न चापरम्।**

**तावन्मात्रेण चाभसो, रूपमेषां चिदात्मनाम्।।**[7]

आध्वानां व्याकृताकाशः न्यायवैशेषिकायोर्दिक्सदृशः सृष्टिप्रलययोरविकृतरूपेणावतिष्ठतें। भूताकाशादयं सर्वथा भिद्यते। उत्पत्तिमत्वाद् भूताकाशस्यानित्यत्वम्. अविकृततत्त्वादस्य तु नित्यत्व व्यापकत्वञ्चेति। लक्ष्मीः खल्वस्याभिमानिनी देवता। प्रकृतिर्हि जडरूपा नित्या व्यापिनी सर्वजीवलिङ्गशरीररूपा। एवं द्वैतवादि माध्वनये, परमात्मा केवलं जगतो निमित्तकारणम् उपादानन्तु प्रकृतिरेव। वैष्णवान्तरवत्

शुद्ध सत्ता नानेन स्वीक्रियते। अस्मात् शुद्धसत्त्वादेव जीवाना लीलामयो विग्रहो निर्मीयतें तत्र सत्त्वाभिमानिनी श्रीः, रजोभिमानिनी भूः, तथा तमोऽभिमानिनी च दुर्गा।

भारतीयदर्शनजगति अन्तिम लक्ष्य क्लेशेभ्यः निवृत्तिः । मम मतेन एतस्याः निवृत्तेः दार्शनिक सम्बोधनं मोक्षः अस्ति। महर्षि दयानन्देन प्रतिपद मोक्षविषयिणी दृष्टिः वैदिकषड्दर्शनदिशा स्वसाहित्ये प्रतिपादिता तदस्माभिः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः निरुक्तभाषायाम् उपेक्षितव्याः उपगम्यः ईक्षितव्याः।

**भक्तिः**– वल्लभसम्प्रदाये भक्तिरपि द्विविधा मर्यादाभक्तिः पुष्टिभक्तिश्च। एतयोरिप वैल्यक्षण्यमेवाद्रीकृतम्। भगवच्चरणारविन्दर्भक्तिरेव मर्यादाभक्तिः। भगवतो मुखारविन्दर्भक्तिस्तु पुष्टिमक्तिः। मर्यादाभक्तिः फलं कामयते, पुष्टिभक्तिस्तु फल नतरामाकाङ्क्षते। मर्यादाभक्तिद्वारा सायुन्यमेव केवलम्, परं पुष्टिभक्तिद्वारा ब्रह्माभेदावबोधः। अतः दुःखक्लेशादिसंवलिताज्जगत उद्धाराय यदि कश्चित् श्रेयस्तरो मार्गस्तहि स पुष्टिमार्ग एवेति तेषां द्रढीयान् विश्वासः। स एव मुमुक्षुभिः सर्वात्मना उपादेयत्वेनाद्रीकार्यः। श्रीमद्भगवद्वल्लभाचार्येण श्रीमद्भागवतस्याध्यात्मतत्वमाधारीकृत्यैव एप पुष्टिमार्गः प्रतिष्ठापितः।

**पुष्टिमार्गः**– आचार्याणामाचारमार्ग एव पुष्टिमार्ग उच्यते पुष्टिशब्दश्चानुग्रहवचनः । पोषण। तदनुग्रहः" मुक्तिम्प्रति प्रमुखकारणता चानुग्रहस्यैवेति' कृत्वैव वर्लभसम्प्रदायोऽयं पुष्टिमार्ग इति पदव्यपदेशभाक्। वाल्लभा मन्यन्ते यदस्ति मर्यादामार्ग पुष्टिमार्गयोः नितरा भेदः। अक्षरब्रह्मणो वाणीतो निःसृतत्वात् मर्यादामार्गोऽयं वैदिकः खलु। परं पुष्टिमार्गस्तु भगवतः पुरुषोत्तमस्य वपुषो निःसृतत्वात् मर्यादाम्गोंऽयं वैदिकः खलु। परं पुष्टिमार्गस्तु भगवतः पुरुषोत्तमस्य वपुषो निर्गत्वात्तथा च प्राह आचार्योऽपि अणुभाष्ये 'पुष्टिमार्गेऽगीकृतस्य ज्ञानादिनरपेक्ष्यमर्यादायामकृतस्य तु तदपेक्षितत्वं तु युक्तमेव' इति। लघुशोधप्रबन्धस्योपसंहारे संक्षेपेण वैदिकदर्शनेषु मोक्षस्य स्वरूप विवेचितम्।

**सन्दर्भाः**


1. सांख्यकारिका 1/1
1. श्री भा 1/1/11
2. छा– 8/12
3. 2/3/42 कौस्तुभे
4. म–सि–सा– पृ– 26
5. मुण्डः 3/1/3
6. मसि सार, पृ 32
7. भा 2/10
8. अणुभाष्य 3/3/21